# दुर्जनस्वभावः ।

1. अतिरमणीये काव्ये पिशुनोन्वेषयति दूषणान्येव ।
अतिरमणीये वपुषि व्रणमोव हि मक्षिकान्वेषयति ।।

2. पिपीलिकार्जितं धान्यम् मक्षिकासञ्चितं मधुः ।
लुब्देन सञ्चितं द्रव्यं समूलं च विनश्यति ।।

3. अकरुणत्वमकारणविग्रहः परधने परयोषिति स्पृहा ।
सुजनबन्धुजनेष्वसहिष्णुता प्रकृतसिद्धमिदं हि दुरात्मनाम् ।।

4. खलः सर्षपमात्राणि परच्छिद्राणि पश्यति ।
आत्मनो बिल्वमात्राणि पश्यन्नपि न पश्यति ।।

5. न विना परिवादेन रमते दुर्जनो जनः ।
काकः सर्वरसान् भुङ्क्त्वा विना मेध्यं न तृप्यति ।।

6. उपकारो हि नीचानामपकारो हि जायते ।
पयः पानं भुजंगस्य केवलं विषवर्धनम् ।।

7. दुर्ज्जनः रिहर्त्तव्यो विद्ययालंकृतो पि सन् ।
मणिना भूषितः सर्पः किमसौ न भयङ्करः ।।

8. तक्षकस्य विषं दन्ते मक्षिकायाः विषं शिरः ।
वृष्चिकस्य विषं पुच्छे सर्वांगे दुर्जनो विषम् ।।

9. सर्वलोकपरितोषकारिणी स्वर्धुनीविमलवारिणी स्थिते ।
पूतिगन्धवति पल्वलोदके सूकरः सुखमतीवमन्यते ।।

10. न दुर्जनः सज्जनतामुपैति
बहुप्रकारैरपि सेव्यमानः ।
भुयो पि सिक्तं पयसा घृतेन
न निंबवृक्षे मधुरत्वमेति ।।